*With Humble Pranams*

*To*

*Sri U.Ve. Mukkur Lakshmi Narasimhachariyar Swamy*

# Taittirīya-Saṃhitā

## Edited by Vijayaraghavan Bashyam

## Book 1, Chapter 1

कृष्ण यजुर्वेदीया तैत्तिरीय संहिता, प्रथमं काण्डम्, प्रथमः प्रपाठकः

दर्शपूर्णमासौ

ह॒रिः॑ ॐ

[[1-1-1-1]]

इ॒षे त्वो॒र्जे त्वा॑

वा॒यव॑ः स्थोपा॒यव॑ः स्थ

दे॒वो वः॑ सवि॒ता प्रार्प॑यतु॒ श्रेष्ठ॑तमाय॒ कर्म॑णे।

आ प्या॑यध्वमघ्निया देवभा॒गमूर्ज॑स्वतीः॒ पय॑स्वतीः प्र॒जाव॑तीरनमी॒वा अ॑य॒क्ष्माः।

मा वः॑ स्ते॒न ई॑शत॒ माऽघश॑ꣳसः।

रु॒द्रस्य॑ हे॒तिः परि॑ वो वृणक्तु।

ध्रु॒वा अ॒स्मिन् गोप॑तौ स्यात ब॒ह्वीः।

यज॑मानस्य प॒शून् पा॑हि॥

[[1-1-2-1]]

य॒ज्ञस्य॑ घो॒षद॑सि

प्रत्यु॑ष्ट॒ꣳ रक्षः॒ प्रत्यु॑ष्टा॒ अरा॑तयः

प्रेयम॑गाद्धि॒षणा॑ ब॒र्हिरच्छ॒ मनु॑ना कृ॒ता स्व॒धया॑ वित॑ष्टा। त आ व॑हन्ति क॒वयः॑ पु॒रस्ता॑द् दे॒वेभ्यो॒ जुष्ट॑मि॒ह ब॒र्हिरा॒सदे॑॥

दे॒वानां॑ परि॒षूत॑मसि

व॒र्षवृ॑द्धमसि

देव॑बर्हि॒र्मा त्वा॒ऽन्वङ्मा ति॒र्यक्

पर्व॑ ते राध्यासम्

आच्छे॒त्ता ते॒ मा रि॑षम्।

देव॑बर्हिः श॒तव॑ल्शं॒ वि रो॑ह स॒हस्र॑वल्शाः॒॥

[[1-1-2-2]]

वि व॒यꣳ रु॑हेम

पृ॒थि॒व्याः सं॒पृचः॑ पाहि

सुसं॒भृ॑ता त्वा॒ संभ॑रा॒मि

अदि॑त्यै॒ रास्ना॑ऽसीन्द्रा॒ण्यै स॒न्नह॑नम्

पू॒षा ते॑ ग्र॒न्थिं ग्र॑थ्नातु॒ स ते॒ माऽऽस्था॒त्।

इन्द्र॑स्य त्वा बा॒हुभ्या॒मुद्य॑च्छे बृ॒हस्पते॑र्मू॒र्ध्ना ह॑रामि

उ॒र्व॑न्तरि॑क्ष॒मन्वि॑हि

देवं॑ग॒मम॑सि॥

[[1-1-3-1]]

शुन्ध॑ध्वं॒ दैव्या॑य॒ कर्म॑णे देवय॒ज्यायै॑

मा॒तरि॑श्वनो घ॒र्मो॑ ऽसि॒

द्यौर॑सि पृथि॒व्य॑सि

वि॒श्वधा॑या असि पर॒मेण॒ धाम्ना॒

दृꣳह॑स्व॒ मा ह्वाः॒।

वसू॑नां प॒वित्र॑मसि श॒तधा॑रं॒

वसू॑नां प॒वित्र॑मसि स॒हस्र॑धारꣳ॥

हु॒तः स्तो॒को हु॒तो द्र॒प्सः॑।

अ॒ग्नये॑ बृह॒ते नाका॑य॒। स्वाहा॒ द्यावा॑पृथि॒वीभ्या॒म्।

सा वि॒श्वायुः॒ सा वि॒श्वव्य॑चाः॒ सा वि॒श्वक॑र्मा॒

सम्पृ॑च्यध्वमृतावरीरू॒र्मिणी॒र्मधु॑मत्तमा म॒न्द्रा धन॑स्य सा॒तये॒

सोमे॑न॒

[[1-1-3-2]]

त्वाऽऽ त॑न॒च्मीन्द्रा॑य॒ दधि॒

विष्णो॑ ह॒व्यꣳ र॑क्षस्व॥

[[1-1-4-1]]

कर्म॑णे वां दे॒वेभ्यः॑ शकेय॒म्।

वेषा॑य त्वा॒

प्रत्यु॑ष्टꣳ॒ रक्षः॒ प्रत्यु॑ष्टा॒ अरा॑तयः॒।

धूर॑सि॒

धूर्व॒ धूर्व॑न्तम्

धूर्व॒  तं यो॑ ऽस्मान् धूर्व॑ति॒ तं धू॑र्व॒ यं व॒यं धूर्वा॑मः

त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतमम्

अह्रुतमसि हविर्धानम्।

दृꣳहस्व मा ह्वाः।

मित्रस्य त्वा चक्षुषा प्रेक्षे

मा भेर्मा सं विक्था मा त्वा॥
[[1-1-4-2]]

हिꣳसिषम्

उरु वाताय

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपाम्यग्नीषोमाभ्याम्

इदं देवानामिदमु नः सह

स्फात्यै त्वा नारात्यै

सुवरभि वि ख्येषं वैश्वानरं ज्योतिः।

दृꣳहन्तां दुर्या द्यावापृथिव्योः।

उर्वन्तरिक्षमन्विहि।

अदित्यास्त्वोपस्थे सादयामि।

अग्ने हव्यꣳ रक्षस्व॥
[[1-1-5-1]]

देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः।

आपो देवीरग्रेपुवो अग्रेगुवो ऽग्र इमं यज्ञं नयताग्रे यज्ञपतिं धत्त

युष्मानिन्द्रो ऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये

प्रोक्षिताः स्थ।

अग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्याम्।

शुन्धध्वं दैव्याय कर्मणे देवयज्यायै।

अवधूतꣳ रक्षो ऽवधूता अरातयः।

अदित्यास्त्वगसि प्रति त्वा॥
[[1-1-5-2]]

पृथिवी वेत्तु।

अधिषवणमसि वानस्पत्यं प्रति त्वाऽदित्यास्त्वग्वेत्तु।

अग्नेस्तनूरसि वाचो विसर्जनम्

दे॒ववी॑तये त्वा गृह्णा॒मि।

अद्रि॑रसि वानस्प॒त्यः

स इ॒दं दे॒वेभ्यो॑ ह॒व्यꣳ सु॒शमि॑ शमि॒ष्व।

इष॒मा व॒दोर्ज॒मा व॑द

द्यु॒मद्व॑दत

व॒यꣳ स॑ङ्घा॒तं जे॑ष्म

व॒र्षवृ॑द्धमसि॒

प्रति॑ त्वा व॒र्षवृ॑द्धं वेत्तु

परा॑पूत॒ꣳ रक्षः॒ परा॑पूता॒ अरा॑तय॒ः।

रक्ष॑सां भा॒गो॑ ऽसि

[[1-1-5-3]]

वा॒युर्वो॒ वि वि॑नक्तु

दे॒वो वः॑ सवि॒ता हिर॑ण्यपाणि॒ः प्रति॑ गृह्णातु॥

[[1-1-6-1]]

अव॑धूत॒ꣳ रक्षो ऽव॑धूता॒ अरा॑तय॒ः।

अदि॑त्या॒स्त्वग॑सि॒ प्रति॑ त्वा पृथि॒वी वे॑त्तु

दि॒व स्क॑म्भ॒निर॑सि॒ प्रति॒ त्वादि॑त्या॒स्त्वग्वे॑त्तु

धि॒षणा॑ऽसि पर्व॒त्या प्रति॑ त्वा दि॒व स्क॑म्भ॒निर्वे॑त्तु

धि॒षणा॑ऽसि पार्व॒तेयी प्रति॑ त्वा पर्व॒तिर्वे॑त्तु

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे ऽश्विनो॑र्बा॒हुभ्या॑ं पू॒ष्णो हस्ता॑भ्या॒मधि॑ वपामि

धा॒न्य॑मसि धिनु॒हि दे॒वान्

प्रा॒णाय॑ त्वा

[[1-1-6-2]]

अपा॒नाय॑ त्वा व्या॒नाय॑ त्वा

दी॒र्घामनु प्रसि॑ति॒मायु॑षे धाम्।

दे॒वो वः॑ सवि॒ता हिर॑ण्यपाणि॒ः प्रति॑ गृह्णातु॥

[[1-1-7-1]]

धृष्टि॑रसि॒ ब्रह्म॑ य॒च्छ।

अपा॑ग्ने ऽग्निमा॒माद॑ं जहि॒ निष्क्र॒व्यादꣳ॑ से॒धाऽऽ दे॑व॒यज॑ं वह॒

निर्द॑ग्ध॒ꣳ॒ रक्षो॒ निर्द॑ग्धा॒ अरा॑तयः।

ध्रु॒वम॑सि पृथि॒वीं दृꣳ॒हाऽऽयु॑र्दृꣳह प्र॒जां दृꣳ॑ह सजा॒ताऩस्मै॒ यज॑मानाय॒ पर्यू॑ह

ध॒र्त्रम॑स्य॒न्तरि॑क्षं दृꣳह प्रा॒णं दृꣳ॑हापा॒नं दृꣳ॑ह सजा॒ताऩस्मै॒ यज॑मानाय॒ पर्यू॑ह

ध॒रुण॑मसि॒ दिवं॑ दृꣳह॒ चक्षुः॑॥
[[1-1-7-2]]

दृꣳह॒ श्रोत्रं॑ दृꣳह सजा॒ताऩस्मै॒ यज॑मानाय॒ पर्यू॑ह॒

धर्मा॑सि॒ दिशो॑ दृꣳह॒ योनिं॑ दृꣳह प्र॒जां दृꣳ॑ह सजा॒ताऩस्मै॒ यज॑मानाय॒ पर्यू॑ह॒

चित॑ः स्थ प्र॒जाम॒स्मै र॒यिम॒स्मै स॑जा॒ताऩस्मै॒ यज॑मानाय॒ पर्यू॑ह॒

भृगू॑णा॒मङ्गि॑रसां॒ तप॑सा तप्यध्व॒म्।

यानि॑ घ॒र्मे क॒पाला॑न्युपचि॒न्वन्ति॑ वे॒धस॑ः। पू॒ष्णस्तान्यपि॑ व्र॒त इ॑न्द्रवा॒यू वि मु॑ञ्चताम्॥
[[1-1-8-1]]

सं व॑पामि॒

समाप॑ो अ॒द्भिर॑ग्मत॒ समोष॑धयो॒ रसे॑न

सꣳ रे॒वती॒र्जग॑तीभि॒र्मधु॑मती॒र्मधु॑मतीभिः सृज्यध्व॒म्

अ॒द्भ्यः परि॒ प्रजा॑ताः स्थ॒ सम॒द्भिः पृ॑च्यध्व॒म्।

जन॑यत्यै त्वा॒ सं यौ॑मि।

अ॒ग्नये॑ त्वाऽग्नीषोमा॑भ्याम्

म॒खस्य॒ शिरो॑ ऽसि

घ॒र्मो॑ ऽसि वि॒श्वायु॑ः।

उ॒रु प्र॑थस्वो॒रु ते॑ य॒ज्ञप॑तिः प्रथता॒म्।

त्वचं॑ गृह्णीष्व॒।

अ॒न्तरि॑त॒ꣳ॒ रक्षो॒ ऽन्तरि॑ता॒ अरा॑तयः।

दे॒वस्त्वा॑ सवि॒ता
[[1-1-8-2]]

श्र॑पयतु॒ वर्षि॑ष्ठे॒ अधि॒ नाके॑।

अ॒ग्निस्ते॑ त॒नुवं॒ माऽति॑ धा॒क्।

अग्ने॑ ह॒व्यꣳ॒ र॑क्षस्व॒

सं ब्रह्म॑णा पृच्यस्व।

ए॒क॒ताय॒ स्वाहा॑ द्वि॒ताय॒ स्वाहा॑ त्रि॒ताय॒ स्वाहा॑॥

[[1-1-9-1]]

आ दंदे।

इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजाः।

वायुरसि तिग्मतेजाः

पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिषम्

अपहतो ऽररुः पृथिव्यै

व्रजं गच्छ गोस्थानम्।

वर्षतु ते द्यौः

बधान देव सवितः परमस्यां परावति शतेन पाशैर्यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्।

अपहतो ऽररुः पृथिव्यै देवयजन्यै

व्रजम्॥

[[1-1-9-2]]

गच्छ गोस्थानम्।

वर्षतु ते द्यौर्

बधान देव सवितः परमस्यां परावति शतेन पाशैर्यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्।

अपहतो ऽररुः पृथिव्या अदेवयजनः।

व्रजं गच्छ गोस्थानम्।

वर्षतु ते द्यौः।

बधान देव सवितः परमस्यां परावति शतेन पाशैर्यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा॥

[[1-1-9-3]]

मौक्।

अररुस्ते दिवं मा स्कान्

वसवस्त्वा परि गृह्णन्तु गायत्रेण छन्दसा रुद्रास्त्वा परि गृह्णन्तु त्रैष्टुभेन छन्दसाऽऽदित्यास्त्वा परि गृह्णन्तु जागतेन छन्दसा

देवस्य सवितुः सवे कर्म कृण्वन्ति वेधसः।

ऋतमस्यृतसदनमस्यृतश्रीरसि

धा असि स्वधा असि।

उर्वी चासि वस्वी चासि

पुरा क्रूरस्य विसृपो विरप्शिन्

[[1-1-9-4]]

उदादाय पृथिवीं जीरदानुर्यामैरयञ्चन्द्रमसि स्वधाभिस्तां धीरासो अनुदृश्य यजन्ते॥
[[1-1-10-1]]

प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयः।

अग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामि

गोष्ठं मा निर्मृक्षं वाजिनं त्वा सपत्नसाहꣳ सं मार्ज्मि

वाचं प्राणं चक्षुः श्रोत्रं प्रजां योनिं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीꣳ सं मार्ज्मि।

आशासाना सौमनसं प्रजाꣳ सौभाग्यं तनूम्। अग्नेरनुव्रता भूत्वा सं नह्ये सुकृताय कम्।

सुप्रजसस्त्वा वयꣳ सुपत्नीरुप॥
[[1-1-10-2]]

सेदिम। अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम्

इमं वि ष्यामि वरुणस्य पाशं यमबध्नीत सविता सुकेतः। धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि

समायुषा सं प्रजया समग्ने वर्चसा पुनः। सं पत्नी पत्याऽहं गच्छे समात्मा तनुवा मम

महीनां पयो ऽस्योषधीनाꣳ रसस्तस्य ते ऽक्षीयमाणस्य निः॥
[[1-1-10-3]]

वपामि

महीनां पयो ऽस्योषधीनाꣳ रसो ऽदब्धेन त्वा चक्षुषावेक्षे सुप्रजास्त्वाय

तेजो ऽसि तेजो ऽनु प्रेह्यग्निस्ते तेजो मा वि नैत्।

अग्नेर्जिह्वाऽसि सुभूर्देवानाम्।

धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे भव

शुक्रमसि ज्योतिरसि तेजो ऽसि

देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः

शुक्रं
[[1-1-10-4]]

त्वा शुक्रायां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामि

ज्योतिस्त्वा ज्योतिष्यर्चिस्त्वा ऽर्चिषि धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामि
[[1-1-11-1]]

कृष्णो ऽस्याखरेष्ठो ऽग्नये त्वा स्वाहा

वेदिरसि बर्हिषे त्वा स्वाहा

बर्हिरसि स्रुग्भ्यस्त्वा स्वाहा

दि॒वे त्वा॒ऽन्तरि॑क्षाय त्वा पृथि॒व्यै त्वा॑

स्व॒धा पि॒तृभ्य॒ ऊर्ग्भ॑व बर्हि॒षद्भ्यः॑।

ऊ॒र्जा पृ॑थि॒वीं ग॑च्छत

विष्णो॒ः स्तू॒पो॒ ऽसि।

ऊर्णा॑म्रदसं त्वा स्तृणामि स्वास॒स्थं दे॒वेभ्यः॑।

गन्ध॒र्वो॑ ऽसि वि॒श्वाव॑सु॒र्विश्व॒स्मा॒दीष॑तो॒ यज॑मानस्य परि॒धिरि॒ड ईडि॒तः।

इन्द्र॑स्य बा॒हुर॑सि॥
[[1-1-11-2]]

दक्षि॑णो॒ यज॑मानस्य परि॒धिरि॒ड ई॑डि॒तः।

मि॒त्रावरु॑णौ त्वोत्तर॒तः परि॑ धत्तां ध्रु॒वेण॒ धर्म॑णा॒ यज॑मानस्य परि॒धिरि॒ड ई॑डि॒तः

सूर्य॑स्त्वा पु॒रस्ता॑त् पा॒तु कस्या॑श्चिद॒भिश॑स्त्याः।

वी॒तिहो॑त्रं त्वा कवे द्यु॒मन्त॒ꣳ समि॑धीम॒ह्यग्ने॑ बृ॒हन्त॑मध्व॒रे

वि॒शो य॒न्त्रे स्थ॒ः।

वसू॑ना॒ꣳ रु॒द्राणा॑मादि॒त्याना॒ꣳ सद॑सि सीद

जु॒हूरु॑प॒भृद्ध्रु॒वाऽसि॑ घृ॒ताची॒ नाम्ना॑ प्रि॒येण॒ नाम्ना॑ प्रि॒ये सद॑सि
[[1-1-11-3]]

सीद।

ए॒ता अ॑सदन्त्सुकृ॒तस्य॑ लो॒के

ता वि॑ष्णो पाहि

पा॒हि य॒ज्ञं पा॒हि य॒ज्ञप॑तिं पा॒हि मां य॑ज्ञ॒नियम्॥
[[1-1-12-1]]

भुव॑नमसि॒ वि प्र॑थस्व।

अग्ने॒ यष्ट॑रि॒दं नम॑ः।

जुह्वे॒ह्यग्निस्त्वा॑ ह्वयति देवय॒ज्यायै॒।

उप॑भृ॒देहि॑ दे॒वस्त्वा॑ सवि॒ता ह्व॑यति देवय॒ज्यायै॒।

अग्ना॑विष्णू॒ मा वा॒मव॑ क्रमि॒षम्।

वि जि॑हाथां॒ मा मा॒ सं ता॑प्तम्।

लो॒कं मे॑ लोककृतौ कृणु॒तम्।

विष्णो॒ः स्थान॑मसि॒।

इत इन्द्रो॑ अकृणोद्वी॒र्या॑णि

सम॒ारभ्यो॒र्ध्वो अ॑ध्व॒रो दि॑वि॒स्पृ॒शम्

अह्रु॑तो

[[1-1-12-2]]

य॒ज्ञो य॒ज्ञप॑ते॒ः।

इन्द्रा॑वा॒न्त्स्वाहा॑

बृ॒हद्भाः

पा॒हि मा॑ ऽग्ने दुश्च॑रिता॒दा मा॒ सु॒च॑रिते भज

म॒खस्य॒ शिरो॑ ऽसि॒ सं ज्योति॑षा॒ ज्योति॑रङ्क्ताम्॥

[[1-1-13-1]]

वाज॑स्य मा प्रस॒वेनो॑द्ग्रा॒भेणोद॑ग्रभीत्। अथा॑ स॒पत्ना॒ꣳ इन्द्रो॑ मे निग्रा॒भेणाध॑राꣳ अकः॥

उ॒द्ग्रा॒भञ्च॑ निग्रा॒भञ्च॒ ब्रह्म॑ दे॒वा अ॑वीवृधन्। अथा॑ स॒पत्ना॑निन्द्रा॒ग्नी मे॑ वि॒षू॒चीना॒न्व्य॑स्यताम्॥

वसु॑भ्यस्त्वा रु॒द्रेभ्य॑स्त्वाऽऽदि॒त्येभ्य॑स्त्वा॒।

अक्तꣳ रिहा॑णा वि॒यन्तु॒ वय॑ः

प्र॒जां योनि॒ं मा निर्मृ॑क्ष॒म्

आ प्याय॑न्ता॒माप॒ ओष॑धयः।

म॒रुतां॒ पृष॑तयः स्थ॒

दिव॑म्॥

[[1-1-13-2]]

गच्छ॒ ततो॑ नो॒ वृष्टि॒मेर॑य।

आ॒यु॒ष्पा अ॑ग्ने ऽस्यायु॑र्मे पाहि

चक्षु॒ष्पा अ॑ग्ने ऽसि॒ चक्षु॑र्मे पाहि

ध्रु॒वाऽसि॒

यं प॑रि॒धिं प॒र्यध॑त्था॒ अग्ने॑ देव प॒णिभि॑र्वी॒यमा॑णस्तं त॑ ए॒तमनु॒ जोषं॑ भरामि॒ नेदे॒ष त्वद॑प॒चेतया॑तै

य॒ज्ञस्य॒ पाथ॒ उप॒ समि॑तम्।

सꣳस्रावभा॑गाः स्थ॒ेषा बृ॒हन्त॑ः प्रस्तरे॒ष्ठा ब॑र्हि॒षद॑श्च॥

[[1-1-13-3]]

दे॒वा इ॒मां वाच॑म॒भि विश्वे॑ गृ॒णन्त॑ आ॒सद्या॒स्मिन्ब॒र्हिषि॑ मादयध्वम्

अ॒ग्नेर्वा॒मप॑न्नगृहस्य॒ सद॑सि सादयामि

सु॒म्नाय॑ सुम्निनी सु॒म्ने मा॑ धत्तम् ।

धु॒रि धु॒र्यौ॑ पा॒तम्

अग्ने॑ ऽदब्धायो ऽशीततनो पा॒हि मा॒ऽद्य दि॒वः पा॒हि प्रसि॑त्यै पा॒हि दुरि॑ष्ट्यै पा॒हि दु॑रद्म॒न्यै पा॒हि दुश्च॑रिता॒त् ।

अवि॑षं नः पि॒तुं कृ॑णु सु॒षदा॒ योनि॒ग्ं॒ स्वाहा॒

देवा॑ गातुविदो गा॒तुं वि॒त्त्वा गा॒तु
[[1-1-13-4]]

मि॑त॒

मन॑सस्पत इ॒मं नो॑ देव दे॒वेषु॑ य॒ज्ञग्ं॑ स्वाहा॑ वा॒चि स्वाहा॒ वाते॑ धाः ॥
[[1-1-14-1]]

उ॒भा वा॑मिन्द्राग्नी आहु॒वध्या॑ उ॒भा राध॑सः स॒ह मा॑द॒यध्यै॑ । उ॒भा दा॒तारा॑वि॒षाग्ं॑ र॑यी॒णामु॒भा वाज॑स्य सा॒तये॑ हुवे वाम् ॥

अश्र॑व॒ग्ं॒ हि भू॑रि॒दाव॑त्तरा वां॒ विजा॑मातुरु॒त वा॑ घा स्या॒लात् । अथा॒ सोम॑स्य॒ प्रय॑ती यु॒वभ्या॒मिन्द्रा॑ग्नी॒ स्तोमं॑ जनयामि॒ नव्य॑म् ॥

इन्द्रा॑ग्नी न॒वतिं॑ पुरो॑ दा॒सप॑त्नीरधूनुतम् । सा॒कमेके॑न॒ कर्म॑णा ॥

शुचिं॒ नु स्तोमं॒ नव॑जातं अ॒द्येन्द्रा॑ग्नी॒ वृत्रहणा जु॒षेथा॑म् ॥
[[1-1-14-2]]

उ॒भा हि वा॒ग्ं॒ सु॒हवा॒ जोह॑वीमि॒ ता वाज॒ग्ं॒ स॒द्य उ॑श॒ते धेष्ठा॑ ॥

व॒यमु॑ त्वा पथस्पते॒ रथं॒ न वाज॑सातये । धि॒ये पू॑षन्नयुज्महि ॥

प॒थस्प॑थः॒ परि॑पतिं वच॒स्या कामे॑न कृ॒तो अ॒भ्या॑नड॒र्कम् । स नो॑ रासच्छु॒रुध॑श्च॒न्द्राग्रा॒ धियं॑ धिय॒ग्ं॒ सीषधाति॒ प्र पू॒षा ॥

क्षेत्र॑स्य॒ पति॑ना व॒यग्ं॒ हि॒तेने॑व जयामसि । गामश्वं॑ पोषयि॒त्वा स नः॑ ॥
[[1-1-14-3]]

मृडाती॒दृशे॑ ॥

क्षेत्र॑स्य पते॒ मधु॑मन्तमू॒र्मिं धे॒नुरि॑व॒ पयो॑ अ॒स्मासु॑ धुक्ष्व । म॒धु॒श्चुतं॑ घृ॒तमि॑व॒ सुपू॑तमृ॒तस्य॑ नः॒ पत॑यो मृडयन्तु ॥

अग्ने॒ नय॑ सु॒पथा॑ रा॒ये अ॒स्मान्विश्वा॑नि देव व॒युना॑नि वि॒द्वान् । यु॒यो॒ध्य॑स्मज्जु॑हुरा॒णमेनो॒ भूयि॑ष्ठां ते॒ नम॑उक्तिं विधेम ॥

आ दे॒वाना॒मपि॒ पन्था॑मगन्म॒ यच्छ॒क्नवा॑म॒ तदनु॒ प्रवो॑ढुम् । अ॒ग्निर्वि॒द्वान्त्स य॑जा॒त् ॥
[[1-1-14-4]]

सेदु॒ होता॒ सो अ॑ध्व॒रान्त्स ऋ॒तून्क॑ल्पयाति ॥

यद्वाहि॑ष्ठं॒ तद॒ग्नये॑ बृ॒हद॑र्च विभावसो । महि॑षीव॒ त्वद्र॒यिस्त्वद्वाजा॒ उदी॑रते ॥

अग्ने॒ त्वं पा॑रया॒ नव्यो॑ अ॒स्मान्त्स्व॒स्तिभि॒रति॑ दु॒र्गाणि॒ विश्वा॑ । पूश्च॑ पृ॒थ्वी ब॑हु॒ला न॑ उ॒र्वी भवा॑ तो॒काय॒ तन॑याय॒ शं योः ॥

त्वम॑ग्ने व्रत॒पा अ॑सि दे॒व आ
[[1-1-14-5]]

मर्त्ये॒ष्वा। त्वं य॒ज्ञेष्वीड्य॑ः॥

यद्वो॑ व॒यं प्र॑मि॒नाम॑ व्र॒तानि॑ वि॒दुषां॑ देवा॒ अवि॑दुष्टरासः। अ॒ग्निष्टद्् विश्व॒मा पृ॑णाति वि॒द्वान्येभि॑र्दे॒वाꣳ ऋ॒तुभि॑ः क॒ल्पया॑ति॥